# Vaidyanatha Ashtakam

# वैद्यनाथाष्टकम्

## Document Information

Text title : Vaidyanatha Ashtakam

File name : vaidyanaatha8.itx

Category : aShTaka, shiva

Location : doc_shiva

Author : Traditional

Transliterated by : Subramanian Ganesh sgesh at hotmail.com

Proofread by : Subramanian Ganesh sgesh at hotmail.com

Latest update : February 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 15, 2025

*sanskritdocuments.org*

Vaidyanatha Ashtakam

# वैद्यनाथाष्टकम्

श्रीरामसौमित्रिजटायुवेद षडाननादित्यकुजार्चिताय । (कुजार्चनाय)
श्रीनीलकण्ठाय दयामयाय श्रीवैद्यनाथाय नमःशिवाय ॥ १॥
शम्भो महादेव शम्भो महादेव शम्भो महादेव शम्भो महादेव ।
शम्भो महादेव शम्भो महादेव शम्भो महादेव शम्भो महादेव ॥

गङ्गाप्रवाहेन्दुजटाधराय त्रिलोचनाय स्मरकालहन्त्रे ।
समस्तदेवैरभिपूजिताय श्रीवैद्यनाथाय  नमः शिवाय ॥ २॥
शम्भो महादेव ....

भक्तप्रियाय त्रिपुरान्तकाय पिनाकिने दुष्टहराय नित्यम् ।
प्रत्यक्षलीलाय मनुष्यलोके श्रीवैद्यनाथाय नमः शिवाय ॥ ३॥
शम्भो महादेव ....

प्रभूतवातादिसमस्तरोगप्रणाशकर्त्रे मुनिवन्दिताय ।
प्रभाकरेन्द्वग्निविलोचनाय श्रीवैद्यनाथाय नमः शिवाय ॥ ४॥ (त्रिलोचनाय)

शम्भो महादेव ....

वाक्श्रोत्रनेत्राङ्घ्रिविहीनजन्तोः वाक्श्रोत्रनेत्रांघ्रिसुखप्रदाय ।
कुष्ठादिसर्वोन्नतरोगहन्त्रे श्रीवैद्यनाथाय नमः शिवाय ॥ ५॥
शम्भो महादेव ....

वेदान्तवेद्याय जगन्मयाय योगीश्वरध्येय पदाम्बुजाय ।
त्रिमूर्तिरूपाय सहस्रनाम्ने श्रीवैद्यनाथाय नमः शिवाय ॥ ६॥
शम्भो महादेव ....

स्वतीर्थमृद्भस्मभृताङ्गभाजां पिशाचदुःखार्तिभयापहाय ।
आत्मस्वरूपाय शरीरभाजां श्रीवैद्यनाथाय नमः शिवाय ॥ ७॥
शम्भो महादेव ....

श्रीनीलकण्ठाय वृषध्वजाय स्रग्गन्धभस्माद्यभिशोभिताय ।

सुपुत्रदारादि सुभाग्यदाय श्रीवैद्यनाथाय नमः शिवाय ॥ ८॥
शम्भो महादेव ....

बालाम्बिकेश वैद्येश भवरोगहरेति च ।
जपेन्नामत्रयं नित्यं महारोगनिवारणम् ॥ ९॥
शम्भो महादेव ....

॥ इति श्री वैद्यनाथाष्टकम् ॥

In some recordings, शम्भो महादेव is
modified or replaced by महादेव महादेव.

Encoded by Subramanian Ganesh sgesh@hotmail.com

*Vaidyanatha Ashtakam*

pdf was typeset on February 15, 2025

Please send corrections to *sanskrit@cheerful.com*